प्रतिफलं, क्ली, (प्रतिफलतीति । प्रति+फल्+अच् ।) प्रतिविम्बम् । यथा,—

"प्रतिफलमवलोक्य स्वीयमिन्दोः कलायां
हरशिरसि परस्या वासमाशङ्कमाना ॥"
इति रसमञ्जरी ॥

तुल्यफलम् । फलं फलञ्च ॥

प्रतिफलनं, क्ली, (प्रति+फल्+ल्युट् ।) प्रतिविम्बम् । यथा,—

"न विम्बं त्वद्विम्बप्रतिफलनलाभादरुणितं
तुलामध्यारोढुं कथमपि न लज्जेत कलया ॥"
इत्यानन्दलहरी । ६२ ॥

प्रतिफलितं, त्रि, (प्रति+फल्+क्त ।) प्रतिविम्बितम् । यथा,—

"मोहातीतो विशुद्धो मुनिभिरभिहितो मोह-
संक्रान्तमूर्त्तिः
साक्षी स्वान्ते तदुत्थे प्रतिफलितवपुः—— ॥"
इत्यादि मुक्तिवादगादाधरी ॥

प्रतिफुल्लकः, त्रि, (प्रतिफुल्लति विकसतीति । प्रति+फुल्ल+ण्वुल् ।) प्रफुल्लः । इति शब्दचन्द्रिका ॥

प्रतिबद्धः, त्रि, प्रतिबन्धविशिष्टः । प्रतिपूर्व्वबन्धधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः ॥

प्रतिबध्यः, त्रि, (प्रति+बन्ध+यत् ।) प्रतिबन्धनीयः । प्रतिबन्धार्हः । यथा । वस्तुतो हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वप्रकारिताशून्यज्ञानवृत्तिप्रकारितानवच्छेदकत्वेनैव प्रतिबध्यत्वं निवेश्यमिति व्याप्त्यनुगमजागदीशी ॥

प्रतिबन्धः, पुं, (प्रति+बन्ध+घञ् ।) कार्य्यप्रतिघातः । तत्पर्य्यायः । प्रतिष्टम्भः २ । इत्यमरः । ३ । २ । २७ ॥ (यथा, रघौ । ८ । ८० ।

"स तपःप्रतिबन्धमन्युना
प्रमुखाविष्कृतचारुविभ्रमाम् ।
अशपद्भव मानुषीति तां
शमवेलाप्रलयोर्म्मिणा भुवि ॥")

प्रतिबन्धकः, पुं, (प्रतिबध्नातीति । प्रति+बन्ध+ण्वुल् ।) विटपः । इति शब्दचन्द्रिका ॥ प्रतिरोधके, त्रि ॥ (यथा, राजतरङ्गिण्याम् ।३।१६६।

"त्यागिनो निष्कलङ्कस्य को दोषोऽस्य महीपतेः ।
ममापुण्यमृते तन्निन्द्यं यच्छ्रेयःप्रतिबन्धकम् ॥")

प्रतिबन्धिः, पुं, (प्रतिबध्नात्यनेनेति । प्रति+बन्ध+इन् ।) अनिष्टान्तरप्रसञ्जकं वाक्यम् । प्रतिबन्धः । यथा । प्रतिबन्धिरनुत्तरत्वादाहेति विशेषव्याप्तिजागदीशी ॥

प्रतिबलः, त्रि, (प्रतिगतं बलमस्य ।) समर्थः । शक्तः । इति त्रिकाण्डशेषः ॥ (प्रतिरूपं बलमस्य ।) तुल्यबलः ॥ (यथा, महाभारते । १ । १५४ । ८ ।

"नायं प्रतिबलो भीरु ! राक्षसापसदो मम ।
सोढुं युधि परिस्पन्दमथवा सर्व्वराक्षसाः ॥")

प्रतिभयं, त्रि, (प्रतिगतं भयं यत्र ।) भयङ्करम् । इत्यमरः । १ । ७ । २० ॥ (यथा, रामायणे । ६ । ६० । ३५ ।

"दिशश्च प्रदिशश्चैव बभूवुः शरसङ्कुलाः ।
तमसा पिहितं सर्व्वमासीत् प्रतिभयं महत् ॥")

भये, क्ली । इति मेदिनी । ये, १२२ ॥

प्रतिभा, स्त्री, (प्रतिभाति शोभते इति । प्रति+भा+कः । टाप् ।) बुद्धिः । इति हेमचन्द्रः ॥ प्रत्युत्पन्नमतित्वम् । इति प्रतिभान्वितशब्द-टीकायां भरतः ॥ नवनवोन्मेषशालिनी प्रज्ञा । यथाह, रुद्रः ।

"प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता ॥"

(यथा च, महाभारते । १२ । २५६ । १ ।

"सूक्ष्मं साधु समुद्दिष्टं नियतं ब्रह्मलक्षणम् ।
प्रतिभा त्वस्ति मे काचित् तां ब्रूयामनुमानतः ॥"

प्रतिभायते इति । प्रति+भा+"आतश्चोपसर्गे ।" ३ । ३ । १०६ । इति अङ् ।) दीप्तिश्च ॥

प्रतिभान्वितः, त्रि, (प्रतिभया अन्वितः ।) प्रगल्भः । प्रत्युत्पन्नमतियुक्तः । इत्यमरः । ३ । १ । २५ ॥

प्रतिभामुखः, त्रि, (प्रतिभान्वितं मुखमस्य ।) प्रगल्भः । इति हेमचन्द्रः । ३ । ७ ॥

प्रतिभावान्, [त्] त्रि, (प्रतिभा विद्यतेऽस्य । प्रतिभा+मतुप् । मस्य वः ।) प्रतिभान्वितः । प्रागल्भ्ययुक्तः । प्रतिभाशब्दादस्त्यर्थे वतुप्रत्ययेन निष्पन्नः ॥ (यथा, कथासरित्सागरे ।४।३२।

"आगच्छन्तीञ्च सायन्तां कुमारसचिवो हठात् ।
अग्रहीदथ साध्वीनमवोचत् प्रतिभावती ॥")

प्रतिभाहानिः, स्त्री, (प्रतिभाया हानिः ।) बुद्धिनाशः । इति शब्दमाला ॥

प्रतिभूः, पुं, (प्रतिरूपः प्रतिनिधिर्वा भवतीति । प्रति+भू+"भुवः संज्ञान्तरयोः ।" ३ । २ । १७६ । इति क्विप् । "धनिकाधमर्णयोरन्तरे यस्तिष्ठति विश्वासार्थं स प्रतिभूः ।" इति सिद्धान्तकौमुदी ॥) लग्नकः । इत्यमरः । २ । १० । ४४ ॥ जामिन् इति पारस्यभाषा ॥ (यथा, प्रद्युम्नविजये । १ अङ्के ।

"यश्चैकः प्रतिभूः फलेषु कृतिनां यज्ञेषु यज्ञेश्वरो
विघ्नस्तोमतमःसमूहतपनः सोऽयं स्वयं
श्रीहरिः ॥")

तस्य कर्त्तव्यत्वं यथा,—

"सभापतेः कर्त्तव्यमाह कात्यायनः ।
'अथ चेत् प्रतिभूर्नास्ति वादयोग्यस्तु वादिनोः ।
स रक्षितो दिनस्यान्ते दद्याद्भृत्याय वेतनम् ॥'
प्रतिभवति तत्कार्य्ये तद्वद्भवतीति प्रतिभूर्लग्नकः । वादयोग्यः विवादफलस्य साधितधनादिदानस्य दण्डदानस्य च क्षमः । वादिनोः भाषावादिनः उत्तरवादिनश्च । तथा च याज्ञवल्क्यः ।
'उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्य्यनिर्णये ।
प्रतिभुवस्त्वभावे च राज्ञा संज्ञपनं तयोः ॥'
राज्ञा संज्ञपनं दण्डतुल्याधिकरणम् । निर्णयस्य कार्य्ये धनादिदाने राजदन्तादित्वात् कार्य्यशब्दस्य पूर्व्वनिपातः । भृत्यस्तद्रक्षको राजनियुक्तः ।" इति व्यवहारतत्त्वम् ॥

प्रतिमः, त्रि, (प्रतिमातीति । प्रति+मा+"आतश्चोपसर्गे ।" ३ । १ । १३६ । इति कः ।) उत्तरपदस्थो सदृशवाचकः । यथा —

"स्युरुत्तरपदे प्रख्यः प्रकारः प्रतिमो निभः ॥"
इति हेमचन्द्रः ॥

(यथा, रामायणे । २ । ४० । १३ ।

"आयसं हृदयं नूनं राममातुरसंशयम् ।
यद्देवगर्भप्रतिमे वनं याति न भिद्यते ॥")

प्रतिमा, स्त्री, (प्रतिमीयते इति । प्रति+मा+अङ् । टाप् ।) अनुकृतिः । गजदन्तस्य बन्धः । इति मेदिनी । मे, ४८ ॥ (प्रतिविम्बम् । यथा, रघुः । ७ । ६४ ।

"निमीलितानामिव पङ्कजानां
मध्ये स्फुरन्तं प्रतिमाशशाङ्कम् ॥"

तथा च कुमारे । ७ । ३६ ।

"आत्मानमासन्नगणोपनीते
खड्गे निषक्तप्रतिमं ददर्श ॥"

प्रतिमीयते अनयेति करणे अङ् ।) मूर्त्तिसदृशमृच्छिलादिनिर्म्मितप्रतिरूपकम् । तत्पर्य्यायः । प्रतिमानम् २ प्रतिविम्बम् ३ प्रतियातना ४ प्रतिच्छाया ५ प्रतिकृतिः ६ अर्च्चा ७ प्रतिनिधिः ८ । इत्यमरः ।२।१०।३६॥ प्रतिच्छन्दः ९ प्रतिकायः १० प्रतिरूपम् ११ । इति हेमचन्द्रः ॥*॥ (यथा, महाभारते । १।१७२।२७ ।

"गिरिपृष्ठे तु सा तस्मिन् स्थिता स्वसितलोचना ।
विभ्राजमाना शुशुभे प्रतिमेव हिरण्मयी ॥")

देवप्रतिमाघटनप्रमाणादि यथा,—

"विष्णोस्तावत् प्रवक्ष्यामि यादृग्रूपं प्रशस्यते ।
शङ्खचक्रधरं शान्तं पद्महस्तं गदाधरम् ॥
छत्राकारं शिरस्तस्य कम्बुग्रीवं शुभेक्षणम् ।
तुङ्गनासं शुक्तिकर्णं प्रशान्तोरुभुजक्रमम् ॥
क्वचिदष्टभुजं विद्याच्चतुर्भुजमथापि वा ।
द्विभुजं वापि कर्त्तव्यं भवनेषु पुरोधसा ॥" * ॥
देयमष्टभुजस्यास्य यथास्थानं निबोध मे ।
खड्गो गदा शरः पद्मं देयं दक्षिणतो हरेः ।
धनुश्च खेटकञ्चैव शङ्खचक्रे च वामतः ॥ * ॥
चतुर्भुजस्य वक्ष्यामि यथैवायुधसंस्थितिः ।
दक्षिणेन गदां पद्मं वासुदेवस्य कारयेत् ॥
वामतः शङ्खचक्रे च कर्त्तव्ये भूतिमिच्छता ।
कृष्णावतारे तु गदा वामहस्ते प्रशस्यते ॥
यथेच्छया शङ्खचक्रमुपरिष्टात् प्रकल्पयेत् ।
अधस्तात् पृथिवी तस्य कर्त्तव्या पादमध्यतः ।
दक्षिणे प्रणतं तद्वत् गरुत्मन्तं निवेशयेत् ।
वामतस्तु भवेल्लक्ष्मीः पद्महस्ता सुशोभना ।
गरुत्मानग्रतो वापि संस्थाप्यो भूतिमिच्छता ॥
श्रीश्च पुष्टिश्च कर्त्तव्ये पार्श्वयोः पद्मसंयुते ।
तोरणञ्चोपरिष्टाच्च विद्याधरसमन्वितम् ॥
देवदुन्दुभिसंयुक्तं गन्धर्व्वमिथुनान्वितम् ।
पत्रवल्लीसमोपेतं सिंहव्यालसमन्वितम् ।
तथा कल्पलतोपेतं स्तुवद्भिरमरेश्वरैः ।
एवंविधो भवेद्विष्णुस्त्रिभागेनास्य पीठिका ॥
नवतालप्रमाणास्तु देवदानवकिन्नराः ।
अतःपरं प्रवक्ष्यामि मानोन्मानं विशेषतः ॥*॥
जालान्तरप्रविष्टानां भानूनां यद्रजः स्फुटम् ।